# संस्कृत वार्ता:

दिनाङ्क : 18/09/2026 सायम् - 06:20

## आदौ मुख्यवार्ता:

- विदेश-मन्त्रिणा डॉ. एस. जयशङ्करेण भूटानस्य विकासात्मक-प्राथमिकतानां कृते भारतस्य पूर्ण-समर्थनम् पुष्टितम्। द्विपक्षीय-सहयोगस्य उभय-हित-सम्बद्धानां विषयाणां च विहिता समीक्षा ।
- बेङ्गलूरु-नगरे अद्य रक्षामन्त्रिणः राजनाथ-सिंहस्य सान्निध्ये एच.ए.एल.-संस्थानेन भारतीय-वायुसेनायै तेजस-एल.सी.ए. अथ एच.टी.टी.-40 प्रशिक्षक-विमानानि समर्पयिष्यन्ते ।
- महाराष्ट्रस्य मुकुटबन-गडचान्दूरयोः मध्ये नूतन-रेलमार्ग-निर्माणाय रेलमन्त्रालयेन त्रिनवत्यधिक-चतुश्शत-कोटि-रूप्यकाणां परियोजना स्वीकृता ।
- जम्मू-कश्मीरस्य उधमपुर-मण्डले ऑपरेशन-सोहन इत्यस्यान्तर्गतं सुरक्षा-बलैः द्वौ जैश-आतङ्कवादिनौ व्यापादितौ, विपुल-मात्रायां शस्त्रास्त्राणि च स्वायत्तीकृतानि।
- वैश्विक-ऋण-मूल्याङ्कन-संस्थया मूडीज् इत्यनया वर्तमान-वित्त-वर्षाय भारतस्य वास्तविक-जी.डी.पी.-वृद्धि-पूर्वानुमानं संवर्ध्य सप्त-प्रतिशतं निर्धारितम् ।
- जपान-देशे प्रवृत्ते एशियायी-क्रीडा-महोत्सवे भारतस्य नवागतेन टेकबॉल-क्रीडकेन क्विन्सी-जोआकिम-डीसूजा इत्यमुना उपात्य-चक्रे प्रवेशः सम्प्राप्तः।

## अथ वार्ता: विस्तरेण

### जयशङ्कर-भूटान- HL-1

विदेशमन्त्री डा. एस्. जयशङ्करः भूटान्-देशस्य विकासलक्ष्याणां प्राथमिकतानां च कृते भारतस्य समर्थनं पुनः दृढीकृतवान्। षोडश तः अष्टादश सितम्बर् पर्यन्तं भूटान्-देशस्य आधिकारिकयात्रायां, डा. जयशङ्करः तस्य भूटानी-समकक्षीयः ल्योनपो डी. एन्. धुङ्ग्येलः च द्विपक्षीय-सहयोगस्य सर्वान् पक्षान्, परस्पर-हित-सम्बद्धान् क्षेत्रीय-अन्ताराष्ट्रिय-विषयाश्च समीक्षितवन्तौ। उभौ पक्षौ भारत-भूटानयोः विशेष-बहु-पक्षीय-सहभागित्वस्य सुदृढीकरणस्य प्रगतिं प्रशंसितवन्तौ। मन्त्रिणा यू. पी. आई-आधारित-सौकर्यस्य परिचालनस्य अपि स्वागतं कृतम्, येन भूटानी-नागरिकाः भूटानी-चलदूरभाषीय-तन्त्रांशस्य उपयोगेन भारते आभासीय माध्यमेन धनानि प्रेषयितुं समर्थाः अभवन्। डॉ. जयशङ्करः भूटान्-देशस्य राज्ञा जिग्मे खेसर नामग्येल् वांग्चुक् अथ भूटान्-देशस्य प्रधानमन्त्रिणा दाशो शेरिंग् तोबगे इत्युभाभ्यां मिलितवान्।

### राजनाथ-बेंगलुरुयात्रा - HL-2

केन्द्रीय-रक्षामन्त्री राजनाथ-सिंहः अद्य बेङ्गलूरु-नगरे हिन्दुस्तान-एयरोनॉटिक्स-लिमिटेड् इत्यनेन निर्मितानां विविध-विमान-प्रणालीनां भारतीय-वायुसेनायै अथ च पवनहंस-संस्थायै समर्पण-समारोहं स्वोपस्थित्या अलङ्करिष्यति।

सार्वजनिक-क्षेत्रस्य विमान-निर्माण-संस्थानं एच.ए.एल. भारतीय-वायुसेनायै द्वे एल.सी.ए. एफ.ओ.सी. प्रशिक्षक-विमाने, पवनहंस-संस्थायै चत्वारि ध्रुव-नेक्स्ट-जनरेशन उदग्रयानानि, अथ च वायुसेनायै प्रथमं एच.टी.टी.-40 प्राथमिक-प्रशिक्षक-विमानं समर्पयिष्यति। अवधेयमिदं वर्तते यत् दशाधिकद्विसहस्रतमे वर्षे षोडश एल.सी.ए.-योद्धृ-विमानानां सहैव एफ.ओ.सी.-प्रारूपे चतुर्णां द्वि-आसन-युक्तानां विमानानां क्रयण-अनुबन्धः सम्पादितः आसीत्।

### राजनाथ-केरलमयात्रा

रक्षामंत्री केरलम राज्यस्य कोच्चि-नगरे "वन् ऐपिक्, मैनी स्टोरीस्-रामकथा कान्क्लेव्" इत्यस्मिन् भागम् अगृह्णात्। सः अवदत् यत् भगवतः श्रीरामस्य कथा सम्पूर्णे एशियाक्षेत्रे विस्तृता अस्ति, ग्रामेषु नगरेषु च प्रतिबिम्बिता अस्ति। रक्षामन्त्रिणा रक्षाक्षेत्रे आपरेशन् सिन्दूर् इत्यादीनां उपलब्धीनां विषये अवधानं प्रदत्तम्। नागरिकाणां जीवनं परिष्कर्तुं उद्दिष्टानां विविध-कल्याणकारी-योजनानां विषये अपि सः अवदत्। आपत्काले वार्तापत्राणां भूमिकां अपि सः अस्मरत्। सः अवदत् यत् बह्व्यः वार्तापत्रिकाः जनानां पक्षं स्वीकृतवत्यः ।

## रेलमार्गस्य निर्माणार्थं - HL-3

दक्षिणमध्यरेलमार्गस्य मुकुटबन-गडचन्दूर-नगरयोः मध्ये प्रायः अष्टत्रिंशत् किलोमीटरमितं यावत् नूतनस्य रेलमार्गस्य निर्माणार्थं भारतीयरेलविभागेन त्रिनवत्यधिक-चतुःशतकोटिरूप्यकाणां परियोजनायाः अनुमोदनं विहितम्। रेलमन्त्रालयः अद्य अवदत् यत् नूतनः रेलमार्गः लघुतरं दक्षतरं च रेलमार्गः प्रदातुं शक्नोति, येन यात्रा-दूरतायाः, परिवहन-समयस्य, तत्सम्बद्धव्ययस्य च न्यूनता भविष्यति। इदं विद्यमानस्य वर्धा-मानिकगढ-खण्डस्य सङ्कीर्णतायाः निवारणार्थं वैकल्पिकमार्गोऽपि प्रददाति, येन वस्तुपरिवहनं इतोऽपि सुगमं भविष्यति। भारतीय-रेल-विभागेन महाराष्ट्रस्य चौक-कर्जत-रेल-खण्डस्य कृते सप्तनवत्यधिक चतुःशतकोटि-रूप्यकाणां व्ययस्य द्विगुणीकरणं स्वीकृतम्। अयं निर्णयः महाराष्ट्र-राज्ये रेल-क्षमता-संवर्धनार्थं, रेल-परिचालनाभिवृध्यर्थं च अभवत्। रेलमन्त्रालयः अवदत् यत् चौक-कर्जत इति खण्डः पनवेल-चौक-कर्जत इति मार्गस्य भागः अस्ति, यत् यात्रिणां वस्तुपरिवहनस्य च महत्त्वपूर्णः मार्गः अस्ति।

## विदेश-मन्त्रालयः

भारतेन रक्त-सागर-क्षेत्रे वर्धमानां सुरक्षा-विषमिकामालक्ष्य गभीरा चिन्ता प्रदर्शिता। नवदिल्ल्यां वार्ताहर-सम्मेलने एकस्य प्रश्नस्य उत्तरं प्रददता विदेश-मन्त्रालयस्य आधिकारिक-प्रवक्त्रा रणधीर-जयस्वालेन विज्ञापितं यत् भारतेन सऊदी-अरब-देशस्य सार्वभौम-क्षेत्रे, विशेषतः नागरिकानाम् आर्थिक-सम्पत्तीनां चोपरि कृतानाम् आक्रमणानां दृढं खण्डनं कृतम्। तेन प्रतिपादितं यत् पवित्र-मक्का-नगरीं लक्ष्यीकृत्य सञ्जातस्य आक्रमण-प्रयासस्य अनन्तरम् अपि भारतेन आधिकारिकं वक्तव्यं निर्गतम् आसीत्। भारतीय-युद्धपोतेन सह पाकिस्तानीय-नौसेना-पोतस्य परस्परं सङ्घर्ष-विषये विदेश-मन्त्रालयस्य प्रवक्ता अवोचत् यत् भारतेन स्वकीय-प्रतिवादस्य उत्तरत्वेन पाकिस्तानेन दत्तस्य प्रत्युत्तरस्य संज्ञानं गृहीतम्। सः पाकिस्तानेन कृतान् सर्वान् मिथ्या-आरोपान् आक्षेपाञ्च सर्वथा अङ्गीकार-योग्यं न इति मत्वा स्पष्टं प्रत्याख्यातवान् ।

## उधमपुर आपरेशन - HL-4

उत्तरसेना-सेनापतिः लेफ्टिनेण्ट् जनरल् प्रतीक शर्मा इत्येषः उधमपुरे आपरेशन्-सोहन् इत्यस्यान्तर्गतं जैशेत्यस्य द्वयोः आतङ्कवादिनोः हननार्थं व्हाइट-नाइट-कॉर्प्स इत्यस्य प्रशंसाम् अकरोत्। सेनायाः उत्तरसेना-सेनापतिः लेफ्टिनेण्ट-जनरल प्रतीक-शर्मा, उधमपुर्-जनपदस्य माजलता-क्षेत्रे आपरेशन-सोहनस्य समये व्हाइट-नाइट-कॉर्प्स इत्यस्य द्रुतं, सुनिश्चितं, व्यावसायिकं च कार्याचरणाय प्रशंसाम् अपि अकरोत्। अस्माकं संवाददात्रानुसारं जम्मू-कश्मीरस्य आरक्षकैः सी. आर्. पी. एफ्. इत्यनेन च सह अविच्छिन्नसमन्वयेन सम्पन्नं गुप्तसूचना-आधारितं सफलम् अभियानम्, भयोत्पादन-निरोध-ग्रिड् इत्यस्मिन् संयुक्त-अन्तर-संस्था-समन्वयस्य शक्तिं पुनः एकवारम् अधोरेखितम् अस्ति। सफलप्रक्रियया जैश-इत्यस्य भयोत्पादकद्वयम् उन्मूलितम्, एकः ओ. जी. डब्ल्यू. निगडितः, अपि च शस्त्राणां विस्फोटकानां च प्राप्तिः अभवत्।

## मूडीज्-मानाङ्कः- HL-5

वैश्विक-ऋण-मूल्याङ्कन-संस्थया मूडीज् इत्यनया वर्तमान-वित्तवर्षे भारतस्य वास्तविक-सकल-घरेलू-उत्पादस्य विकास-मानाङ्क-पूर्वानुमानं षट्-प्रतिशततः संवर्ध्य सप्त-प्रतिशतं यावत् विहितम्। संस्थया स्पष्टीकृतं यत् अयं ऊर्ध्वमुखी-संस्कारः पश्चिम-एशिया-सङ्घर्षेण जनितात् वैश्विक-आघातात् परमपि भारतीय-अर्थव्यवस्थायाः प्रत्यस्थताम् दृढतां च प्रदर्शयति।

मूल्याङ्कन-संस्थानुसारं जी-20 समूहेषु सर्वेभ्यः देशेभ्यः अपेक्षया भारतस्य आर्थिक-वृद्धिः तीव्रतरा भविष्यति। मूडीज्-संस्थया उल्लिखितं यत् षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य प्रथमार्धे वार्षिक-दृष्ट्या भारतस्य वास्तविक-जी.डी.पी.-वृद्धिः अष्ट-दशमलव-द्वि-प्रतिशतं प्राप्ता, या पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य समानावधौ सप्त-दशमलव-त्रि-प्रतिशतं आसीत्।

## ऋतु-विभाग

भारत-ऋतु-विभागेन अद्य बिहार-राज्ये, पूर्वीराजस्थान-राज्ये, गुजरात-राज्ये, लक्षद्वीपे, ओडिशा-राज्ये, उपहिमालयी-पश्चिमबङ्गालप्रदेशे, सिक्किम्-प्रदेशे च प्रचण्डवृष्ट्यै पूर्वानुमानं प्रकटितम्। आई. एम्. डी. इत्यस्य अनुसारं, आगामि-दिनेषु अण्डमान्-निकोबार्-द्वीपेषु, केरलम-माहे-तमिलनाडु-पुदुचेरी-करैकल-प्रदेशेषु च मेघगर्जनेन सह प्रचण्डवृष्टिः, विद्युद्योतनं च भवितुम् अर्हति। ।

## क्रीडा - HL-6

जपान-देशस्य आइची-नागोया-नगरे समायोज्यमाने विंशतितमे एशियायी-क्रीडा-महोत्सवे भारतस्य क्विन्सी-जोआकिम-डीसूजा इत्येषा अद्य प्रातःकाले महिला-एकल-स्पर्धायां विजय-द्वयं सम्प्राप्य टेकबॉल-क्रीडायाः उपान्त्य-चक्रे प्रविष्टवती।

॥ इति वार्ता: ॥